कुलाख्ये स्थायिनो नूनं सन्धिश्चैव कुलाकुले ॥”

अथ कुम्भचक्रम् ।

“कुम्भाकारं लिखेच्चक्रं तिर्य्यग्रेखाप्रभेदितम् ।
क्रमादूर्द्ध्वमधो लेख्यमेकैकान्तरभं क्रमात् ॥
भानुभानि लिखेत्तत्र रिक्तः पूर्णं इति क्रमात् ।
एवं राशिक्रमो लेख्यो रिक्तः पूर्णं इति द्विधा ॥
रिक्ते रिक्ता भवेद्यात्रा पूर्णे पूर्णा शुभावहा ॥”

अथ कोटचक्रम् ।

“अथातः सम्प्रवक्ष्यामि कोटचक्रमिहाष्टधा ।
स्तोकोऽरिः कुरुते यत्र भूरिसैन्यपराजयम् ॥
प्रथमो न्टण्मयः कोटो द्वितीयो जलकोटकः ।
तृतीयो ग्रामकोटश्च चतुर्थस्तत्र गह्वरः ॥
पञ्चमो गिरिकोटश्च षष्ठः कोटश्च डामरः ।
सप्तमो वक्रभूमिष्ठो विषमाख्यस्तथाष्टमः ॥
न्टण्मये साधयेत् खण्डिं जलस्थे बन्धमोचनम् ॥
ग्रामदुर्गेऽग्निदाहश्च प्रवेशं गह्वरे तथा ।
पर्व्वते स्थानभेदश्च भूतलं डामरे रणे ॥
वक्रस्थे कवियोगश्च विषमे स्थायियायिनौ ।
अतिदुर्गं कालकर्णं चक्रावर्त्तश्च टिङ्गनम् ॥
तुलावर्त्तश्च पद्माख्यो यन्त्रभेदश्च शार्व्वरम् ।
एतन्नामाष्टकं ज्ञेयं वर्गाष्टकक्रमेण च ॥
यस्य वर्गस्य ये भव्या वर्ण्यास्तन्नामनागराः ।
योजयेत् तेन वर्गेण तद्वर्गास्तस्य भङ्गदाः ॥
अ गरुड़ः क मार्जारश्च सिंहश्च शुनीसुतः ।
त सर्पश्च प आखुश्च य गजः श अजासुतः ॥
दुर्गवर्गस्य ये भव्या वर्गनामस्थिता नराः ।
तद्वर्गे ते रणे त्याज्या न कर्त्तव्या गड़ाधिपाः ॥
अवर्गात् पञ्चमे स्थाने खण्डिभङ्गश्च जायते ।
अवर्गाद्यष्टकं ज्ञेयं पूर्व्वाद्यष्टदिशां क्रमात् ॥
कोटचक्रं लिखेच्चादौ चतुरस्रं त्रिनाड़िकम् ।
कृत्तिकादीनि धिष्ण्यानि साभिजिन्ति न्यसेद्बुधः ॥
वहिःकोटे तथा मध्ये कोटे मध्ये वहिर्वहिः ।
प्रवेशो निर्गमस्तत्र ज्ञातव्यः स्वरवेदिभिः ॥
वहिर्दादशभान्यत्र प्राकारे तारकाष्टकम् ।
दुर्गमध्ये तथा चाष्टौ मध्ये स्तम्भचतुष्टयम् ॥
कृत्तिकापुष्यसर्पैश्च मघास्वातिविशाखभे ।
अनुराधाभिजिद्विष्णुर्धनिष्ठाश्वियमा वहिः ॥
ब्राह्मा पुनर्व्वसूभाग्यं चित्रा ज्येष्ठा तथोत्तराः ।
शतभं रेवती चैव प्राकारे तारकाष्टकम् ॥
न्टगरौद्रोत्तरा हस्तं मूलमाषाढ़पूर्व्वकम् ।
पूर्व्वोत्तरा तथा भद्रा मध्ये ऋक्षाष्टकं विदुः ॥
पूर्व्वे रौद्रं यमे हस्त पूर्व्वाषाढ़ा च वारुणे ।
उत्तरे चोत्तरं भाद्रमेतत् स्तम्भचतुष्टयम् ॥
कृत्तिकाद्यं मघाद्यञ्च मैत्राद्यं वासवादिकम् ।
त्रीणि त्रीणि प्रवेशे च भानि द्वादश निर्गमे ॥
कृत्तिकादिरयं न्यासः सुबोधोऽयं प्रदर्शितः ।
दुर्गभाद्गणनाचात्र ग्रहैर्व्वाच्यं ततः फलम् ॥
चतुरस्रं तथावृत्तं त्रिकोणं वृत्तदीर्घकम् ।
अर्द्धचन्द्रं वर्त्तुलञ्च गोस्तनं धनुराकृति ॥
चतुरस्रे यथा न्यासो भूमिभागक्रमेण च ।
प्रवेशे निर्गमे स्तम्भे तथा वृत्तादिसप्तके ॥
दद्यौ भित्तिविभागेन दातव्यं धिष्ण्यमण्डलम् ।
वाह्यभे मध्यभे चैव यत्रस्थाः क्रूरखेचराः ॥
तत्र स्थाने कृते यत्ने हस्तिदुर्गं ससैनिकम् ।
ऊर्द्ध्वदृष्टी च भौमार्कौ केकरौ बुधभार्गवौ ॥
समदृष्टी च जीवेन्दू शनिराहू ह्यधोदृशौ ।
नाड़ीत्रये वहिर्मध्ये गर्भे नामादि लिख्यते ॥
कालपदौदृशर्क्षेभ्यः पराक्रमविवक्षया ।
चातुर्भे कालनाड़ीस्थे न्टत्युर्मध्यपदे स्थिते ॥
चौर्य्यक्षयोपतापाश्च रौद्रनाद्यां पुरग्रहः ।
क्रूरा गर्भे पुरं हन्ति प्राकारे खण्डिकारकाः ॥
वहिःस्था वेष्टके सैन्ये भङ्गदा नात्र संशयः ।
क्रूरा गर्भे शुभा वाह्ये गृह्यते निश्चितं पुरम् ॥
सौम्या मध्ये वहिः क्रूरा असाध्यं दुर्गमुच्यते ।
क्रूरचतुष्टयं मध्ये प्राकारे सौम्यखेचराः ॥
भेदाद्भङ्गो भवेद्दुर्गे विना युद्धेन गृह्यते ।
प्राकारे संस्थिताः क्रूरा मध्ये सौम्यग्रहा यदि ॥
दुर्गभङ्गे समुत्पन्ने भङ्गमायान्ति वेष्टकाः ।
मध्यनाड़ीस्थिताः सौम्याः क्रूरा वहिरवस्थिताः ॥
सैन्यावर्त्तो वहिः शत्रोर्विना युद्धेन जायते ।
प्राकारे पुरमध्ये च यदा क्रूरा व्यवस्थिताः ॥
सौम्या वाह्ये तदा दुर्गमयत्नेनापि सिध्यति ।
सौम्या मध्ये च कोटे च वाह्ये पापग्रहा यदि ॥
दैवैर्न्नृपादिभिः कोटो गृह्यते न कदाचन ।
प्राकारवाह्यगाः क्रूराः सौम्या मध्यगता यदि ॥
युद्धं प्राकारखण्डिश्च पुरभेदो न जायते ।
स्तम्भान्तरगता यस्य ग्रहाः सौम्याः शुभान्विताः ॥
भवेयुस्तस्य कोटस्य न नाशो विद्यते क्वचित् ।
स्तम्भान्तरगता यस्य रविराहुशनैश्चराः ॥
भूमिपुत्तश्च तस्याशु नाशः कोटस्य निश्चितम् ।
सौम्या वाह्ये तथा कोटे मध्ये क्रूरग्रहाः स्थिताः ॥
स्वयं दुर्गं प्रयच्छन्ति वेष्टकाय गड़ाधिपाः ।
वाह्याभ्यन्तरगाः क्रूराः प्राकारे शोभनग्रहाः ॥
रिपुद्वयं क्षयं याति विना युद्धेन निश्चितम् ।
प्रकारस्था ग्रहाः क्रूरा वहिर्मध्ये शुभाः स्थिताः ॥
समयुद्धं भवेत्तत्र खण्डिपातो दिने दिने ।
सौम्याः क्रूरास्तथा चाष्टौ प्राकारमध्यवाह्यगाः ॥
एकस्था यत्र कुर्व्वन्ति संग्रामस्तत्र दारुणम् ।
गजाश्वरथभूपालाः सामन्ता मण्डलेश्वराः ॥
कुर्व्वन्ति च भटा युद्धमुभयोरपि सैन्ययोः ।
विचार्य्य कुरुते युद्धं कोटचक्रं स्वरोदयी ॥
प्रदेशधिष्ण्यगे चन्द्रे जीवपक्षैःसंस्थिते ।
निशीथे कविरक्षं दुर्गे कर्त्तव्यं वेष्टकैर्नृपैः ॥
कर्त्तव्यं कवियुद्धञ्च रात्रौ सुप्ते वहिर्जने ।
प्रवेशनिर्गमावुक्तौ सेनयोरुभयोरपि ॥
कवौ कोटे जयो युद्धे विपरीते पराजयः ।
विहाय प्रकृतं चारं वक्रं गच्छति चेद्गुरुः ॥
तदा प्रागदिशि भङ्गः स्यात् रुद्धयोः पूर्व्वसैन्ययोः ।
भौमे च वक्रिते भङ्गो भवेत् दक्षिणतोऽत्र च ॥
भवेत् पश्चिमतो भङ्गो भार्गवे वक्रगामिनि ।
बुधे वक्रगते चैव भङ्गश्चोत्तरतो भवेत् ॥
यदि तत्र स्थितौ स्यातां न आत्मकर्शनैश्चरौ ।
क्रूरो वक्री प्रवेशर्क्षे पुरमध्ये स्थितो यदा ।
तदा कोटविनाशाय कोटस्थो वाह्यभूपतेः ॥
प्रवेशवाह्यगे क्रूरे वक्रे स्वसैन्यविग्रहः ।
दुर्भिक्षं न्टत्युभङ्गौ च वहिः सैन्यस्य जायते ॥
निर्गमर्क्षे वहिःस्थे च क्रूरो वक्रं करोति चेत् ।
प्राकारस्य भवेद्भङ्गः प्राकारस्थे पुरस्य च ॥
पुरभे निर्गमे वक्राः कथञ्चित् क्रूरखेचराः ।
दुर्गं त्यक्त्वा तदा काले दुर्गस्थः प्रपलायते ॥
यथा क्रूरैस्तथा सौम्यैः फलं ग्राह्यं विपर्य्ययात् ।
मिश्रैर्मिश्रं विजानीयात् कोटचक्रे न संशयः ॥
दुर्गसैन्यं तथैवोच्चं प्राकारे मध्यभागगम् ।
नीचस्थं वेष्टकं सैन्यं ज्ञातव्यं स्वरवेदिभिः ॥
कोटे कोटाधिपे नीचौ विघ्नदौ भौमभास्करौ ।
समस्थौ च पुरे सर्व्वे उच्चस्थौ निष्फलौ च तौ ॥
प्राकारं वेष्टकं हन्ति उच्चस्थौ राहुसूर्य्यजौ ।
प्राकारस्थौ वहिःसैन्यं नीचस्थौ तौ च निष्फलौ ॥
सितेऽर्कपुत्रे तु रवौ गुरावन्नसितेऽपि च ।
वक्रिता नैव शक्ताः स्युर्विधातुं कोटभेदनम् ॥
समदृष्ट्या गुरुश्चन्द्रः पश्यतः सर्व्वतः सदा ।
तिर्य्यक्स्थितौ बुधशुक्रौ फलदौ नात्र संशयः ॥
ऊर्द्ध्वदृष्टिग्रहे कुर्य्यात् टिङ्गनीयन्त्रवाहनम् ।
समे च साधयेत् खण्डिं रन्ध्रपातमधोमुखे ॥
कोटभं मुखपुच्छस्थं राहोर्यदि गलादिके ।
कोटश्च भज्यते क्षिप्रं पूर्व्वोक्तविधिना चिरात् ॥
दुर्गमध्यगते सूर्य्ये जलशोषः प्रजायते ।
चन्द्रे भङ्गः कुजे दाहो बुधे बुद्धिबला नराः ॥
वाक्पतौ दुर्गमध्यस्थे सुभिक्षं प्रचुरं जलम् ।
चलचित्ता नराः शुक्रे न्टत्युरोगौ शनैश्चरे ॥
राहौ मध्यगते दुर्गे भङ्गो भेदो महद्भयम् ।
केतौ मध्यगते तत्र विषादः स्याद्गड़ाधिपे ॥
सौरिश्च वाक्पतिश्चैव भवेतां दिशि संस्थितौ ।
यस्यां तया स कोटस्तु भज्यते नात्र संशयः ॥
इत्येवोक्तं फलं मध्ये एवं वाह्यगते ग्रहे ।
उपग्रहसमायोगादत्यन्तं प्राणसंशयः ॥
अकारादिस्वराः पञ्च पूर्व्वाशादिचतुष्टये ।
मध्यान्ताः सप्तमालेख्या अन्तस्थाः खण्डि-
कारकाः ॥
दुर्गनाम्नः स्वरो यस्य वालो वाल्लमितोऽपि वा ।
तद्दिने प्रारभेत् युद्धं दुर्गं सिध्यति नान्यथा ॥”

इति कोटचक्रम् ॥

इति समयामृतम् ॥*॥ चक्रान्तराणि तत्तच्छब्दे द्रष्टव्यानि ॥ (चित्रकाव्यविशेषः । शब्दालङ्कारभेदः । अस्य च तथाविधलिपिसन्निवेशवशेन चमत्कारिविधायिनामपि वर्णानां तथाविधश्रोत्राकाशसमवायविशेषवशेन चमत्कारिविधायिभिर्वर्णैरभेदेन उपचारत्वात् शब्दालङ्कारत्वम् । उदाहरणं यथा, काव्यालङ्कारे । ५ । ६—१३ ।

“माराविशक्रारामेभमुखैरासाररंहसा ।
साराराब्धस्तवा नित्यं तदर्तिहरणक्षमा ॥
माता नतानां संघट्टः श्रियां वाधितसम्भ्रमा ।
मान्याथ सीमारामाणां शं मे दिश्यादुमादिजा ॥
मायाविनं महाहावा रसायातं ससङ्गुजा ।
जातलीला यथा सारवासं महिषमावधीः ॥